( म्रियन्ते प्राणिनो यस्या इति । मृङ्+घञ् । ङीष् । महती मारी ।) अतिशयमरकश्च ॥
महामाषः, पुं, ( महांश्चासौ माषश्चेति ।) राजमाषः । इति शब्दचन्द्रिका ॥ (यथा, सुश्रुते सूत्रस्थाने २१ अध्याये । “माषमहामाषगोधूमतिलपिष्टविकृतिदधिदुग्धकृशरापायसेक्षुविकारानूपौदकमांसवसाविसमृणालकशेरुकशृङ्गाटकमधुरवल्लीफलसमशनाध्यशनप्रभृतिभिः श्लेष्मा प्रकोपमापद्यते ।” तथास्य पर्य्यायो गुणाश्च ।
“राजमाषो महामाषश्चपलश्चवनः स्मृतः ।
श्वेतो रक्तस्तथा कृष्णस्त्रिविधः स प्रकीर्त्तितः ॥
यो महांस्तेषु भवति स एवोक्तो गुणाधिकः ॥”
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
महासुखः, पुं, ( महत् सुखमस्य । ) कुम्भीरः । इति हेमचन्द्रः । ४ । ४१६ ॥ (महत् सुखम् । ) ब्रह्मसुखे, क्ली । ( यथा, बृहत्संहितायाम् । ६७ । ५४ ।
“वक्त्रं सौम्यं संवृतममलं श्लक्ष्णं समञ्च भूपानाम् ।
विपरीतं क्लेशभुजां महासुखं दुर्भगानाञ्च ॥”
महत् सुखं यस्य ।) तद्वति, त्रि ॥ (महादेवः । यथा, महाभारते । १३ । १७ । ८७ ।
“महादन्तो महादंष्ट्रो महाजिह्वो महासुखः ॥”
सिन्धुराजस्य सैनिकभेदः । यथा, महाभारते । ३ । २७० । १६ ।
“नकुलन्त्वभिसन्धाय क्षेमङ्करमहासुखौ ।
उभावुभयतस्तीक्ष्णैः शरवर्षैरवर्षताम् ॥”)
महामुनिः, पुं, ( महांश्चासौ मुनिश्चेति । ) अगस्त्यः । बुद्धः । इति शब्दरत्नावली ॥ कृपाचार्य्यः । कालः । इत्यजयपालः ॥ व्यासः । (श्रीनारायणः ।) यथा, श्रीभागवते ।१।१।२।
“धर्म्मः प्रोज्झितकैतवोऽत्र परमो निर्म्मत्सराणां सतां
वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम् ।
श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरः ·
सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात् ॥
(महामुनिः श्रीनारायणः । इति तट्टीकायां श्रीधरः ।) तुम्बुरुश्च । इति राजनिर्घण्टः ॥
महामुनि, क्ली, ( महान् मुनिरिवेति । सर्व्वोपकारित्वात्तथात्वम् । अभिधानात् क्लीवत्वम् । ) औषधम् । इति शब्दरत्नावली ॥ धन्याकम् । इति जटाधरः ॥
महामूर्द्धा, [न्] पुं, ( महान् मूर्द्धा यस्य । व्यापकत्वात् तथात्वम् ।) शिवः । इति महाभारते तस्य सहस्रनामस्तोत्रम् ॥ बृहन्मस्तकयुक्ते, त्रि ॥
महामूलः, पुं, (महत् स्थूलं मूलं यस्य ।) राजपलाण्डुः । इति राजनिर्घण्टः ॥ (हिलिमोचिका ॥ यथास्य पर्य्यायः ।
“हिलिमोचिका महामूलः पातालगरुडाह्वयः ॥”
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

महामूल्यं, क्ली, महार्घम् । बहुमूल्यम् । महच्च तन्मूल्यं चेति कर्म्मधारयसमासनिष्पन्नम् । (महत् मूल्यं यस्य । ) तद्युक्ते, त्रि ॥
महामूषिकः, पुं, (महान् मूषिकः ।) बृहदुन्दुरः । तत्पर्य्यायः । मूषी २ विघ्नेशवाहनः ३ महाखुः ४ शस्यमारी ५ भूफलः ६ भित्तिपातनः ७ । इति राजनिर्घण्टः ॥
महामृगः, पुं, ( महान् मृगः पशुः । ) हस्ती । इति हेमचन्द्रः ।४।२८३॥ शरभः । इति राजनिर्घण्टः ॥
महामृत्युञ्जयः, पुं, ( महामृत्युं यमं जयतीति । जि+खच् मुम् च । ) शिवस्य मन्त्रविशेषः । यथा,—
देव्युवाच ।
“यदि मे महती प्रीतिस्तवास्ति कुलभैरव ! ।
कथयस्व विशेषेण महामृत्युञ्जयाभिधम् ॥
भैरव उवाच ।
शृणु देवि ! प्रवक्ष्यामि महामृत्युञ्जयाभिधम् ।
आयुर्वृद्धिकरं पुंसां मृत्योर्मृत्युकरं परम् ॥
यस्य विज्ञानमात्रेण चिरजीवी निरामयः ।
नित्यमष्टशतं जप्त्वा मृत्युं मृत्युपथं नयेत् ॥”
इति मृत्युञ्जयतन्त्रम् ॥
महामेघः, पुं, ( महान् मेघ इव । ) शिवः । इति महाभारते तस्य सहस्रनामस्तोत्रम् ॥ ( महान् मेघः ।) अतिशयमेघश्च ॥ (यथा, महाभारते । १२ । ११७ । ४ ।
“महामेघनिभं दृष्ट्वा स भीतो ह्यभवत् गजः ॥”
क्षत्त्रियराजविशेषः । यथा, महाभारते । ७ । ४७ । १५ ।
“शत्रुञ्जयं चन्द्रकेतुं महामेघं सुवर्च्चसम् ।
सूर्य्यभासञ्च पञ्चैतान् हत्वा विव्याध सौबलम् ॥”)
महामेदः, पुं, ( मेदयति स्निग्धीकरोतीति । मिद्+णिच्+अच् । महान् मेदः ।) अष्टवर्गे प्रसिद्धौषधविशेषः । तत्पर्य्यायः । पुरोद्भवः २ । इति रत्नमाला ॥ बृहन्मेदश्च ॥
महामेदा, स्त्री, ( मेदयतीति । मिद+णिच्+अच् । टाप् । महती मेदा । ) अष्टवर्गे प्रसिद्धौषधविशेषः ॥ तत्पर्य्यायः । वसुच्छिद्रा २ जीवनी ३ पांशुरागिणी ४ देवेष्टा ५ सुरामेदा ६ दिव्या ७ देवमणिः ८ देवगन्धा ९ महाच्छिद्रा १० त्रिदन्ती ११ । अस्याः गुणाः । हिमत्वम् । बल्यत्वम् । कफशुक्रवृद्धिकारित्वम् । दाहास्रपित्तक्षयवातज्वरनाशित्वञ्च । इति राजनिर्घण्टः ॥ * ॥ अथ मेदमहामेदयोरुत्पत्तिलक्षणनामगुणाः ।
“महामेदाभिधः कन्दो मोरङ्गादौ प्रजायते ।
महामेदा वसुर्मेदा स्यादित्युक्तं मुनीश्वरैः ॥
शुक्लार्द्रकनिभः कन्दो लताजातः स पाण्डुरः ।
महामेदाभिधो ज्ञेयो मेदालक्षणमुच्यते ॥
शुक्लकन्दो नखच्छेद्यो मेदो धातुरिव स्रवेत् ।
यः स मेदेति विज्ञेया जिज्ञासातत्परैर्जनैः ॥
स्वल्पपर्णी मणिच्छिद्रा मेदा मेदोभवाध्वरा ।
महामेदा वसुच्छिद्रा त्रिदन्ती देवतामणिः ॥
मेदायुग्मं गुरु स्वादु वृष्यं स्तन्यकफावहम् ।
बृंहणं शीतलं पित्तरक्तवातज्वरप्रणुत् ॥”
इति भावप्रकाशः ॥
महामैत्रः, पुं, ( मित्रस्य भावः । मित्र+अण् । मैत्रम् । महद्भिः सह महद्वा हृदि मैत्रमस्येति ।) बुद्धभेदः । इति हेमचन्द्रः ।२।१४६॥
महामोहः, पुं, (मोहः भ्रान्तिज्ञानम् । अतथाभूते वस्तुनि तथात्वज्ञानमित्यर्थः । महान् मोहः ।) भोगेच्छारूपाज्ञानम् । इति केचित् ॥ संसारमूलकारणरागरूपमोहः । ( महान् मोहो यस्मादिति च । ) महामोहजनककामराजबीजम् । इति चण्डीप्रथममाहात्म्यटीकायां नागोजीभट्टः ॥ अपि च ।
“ससर्ज्जाग्रेऽन्धतामिस्रमथ तामिस्रमादिकृत् ।
महामोहञ्च मोहञ्च तमश्चाज्ञानवृत्तयः ॥”
इति श्रीभागवते ३ स्कन्धे १२ अध्यायः ॥
अग्र इति ब्रह्मा स्वष्टौ प्रथममविद्यावृत्तीः ससर्ज्ज तत्र तमो नाम स्वरूपाप्रकाशः । मोहो देहाद्यहंबुद्धिः । महामोहो भोगेच्छा । तामिस्रः तत्प्रतिघाते क्रोधः । अन्धतामिस्रः तन्नाशे अहमेव मृतोऽस्मीति बुद्धिः । तदेवोक्तं वैष्णवे ।
“तमोऽविवेको मोहः स्यादन्तःकरणविभ्रमः ।
महामोहश्च विज्ञेयो ग्राम्यभोगसुखैषणा ॥
मरणं ह्यन्धतामिस्रं तामिस्रं क्रोध उच्यते ।
अविद्या पञ्चपर्व्वा या प्रादुर्भूता महात्मनः ॥”
इति तट्टीकायां श्रीधरस्वामी ॥
महाम्लं, क्ली, (महत् अम्लं अम्लरसयुक्तम् । यद्वा, महान् अम्लः अम्लरसो यस्मिन् । ) तिन्तिडीकम् । इति जटाधरः ॥ ( अत्यम्लरसविशिष्टे, त्रि ॥ )
महायक्षः, पुं, ( यक्षयते पूजयति इति । यक्ष्+अच् । महान् यक्षः । ) अर्हदुपासकविशेषः । इति हेमचन्द्रः । १ । ४१ ॥
महायज्ञः, पुं. ( महान् यज्ञः । ) वेदपाठादिरूपपञ्चप्रकारयज्ञः । यथा,—
“पाठो होमश्चातिथीनां सपर्य्या तर्पणं बलिः ।
एते पञ्च महायज्ञा ब्रह्मयज्ञादिनामकैः ॥”
इत्यमरः । २ । ७।१४ ॥
अपि च ।
“दिव्यो भौमस्तथा पैत्रो मानुषो ब्राह्म एव च ।
एते पञ्च महायज्ञा ब्रह्मणा निर्म्मिताः पुरा ॥
ब्राह्मणानां हितार्थाय इतरेषाञ्च तन्मुखाः ।
इतरेषान्तु वर्णानां ब्राह्मणैः कारिताः शुभाः ॥
एवं कृत्वा नरो भुक्त्वा साहुरिचि ! विशुध्यति ।
अन्यथा भीहयोऽयते एकैके मृगपक्षिणः ॥
मन्तया दारुभोक्तॄणां महामांसमुतत् स्मृतम् ॥”
इति वराहपुराणम् ॥
( यथा च मनौ । २ । २८ ।
महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः ॥” )